# संस्कृतवार्ता:

दिनाङ्क : - 06/08/2025 सायम् : - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् कृषकाणां कल्याणम् एव तस्य सर्वकारस्य सर्वोच्चप्राथमिकता अस्ति । सहैव कृषकाणाम् आयं वर्धयितुं स्वकीयां प्रतिबद्धताम् अपि सः अप्रकाशयत् ।
- राष्ट्रियसुरक्षापरामर्शदः अजीत-डोभालः अद्य मास्कोनगरे रूसस्य सुरक्षापरिषदः प्रमुखेन सर्गेई-शोइगु इत्यनेन सह मिलितवान्।
- विशिष्ट-गहन-संशोधन-अभियानम् अन्यविषयान् च अधिकृत्य विपक्षिदलानां विरोधेन लोकसभायाः राज्यसभायाः च कार्याचरणं निरन्तरं बाध्यते ।
- उत्तराखण्डे मेघविस्फोटनेन जातस्य भूस्खलनस्य अनन्तरम् बृहदस्तरीयाणि साहाय्योद्धार-कार्याणि तृतीयदिवसे अपि प्रचलन्ति ।
- ऋतुविज्ञानविभागेन अद्य पूर्वोत्तर-राज्येषु, उपहिमालयीय-पश्चिमबङ्ग-क्षेत्रे, च अति वृष्टेः सञ्चेतना प्रसारितास्ति ।

-----------------------------------------

<u>प्रधानमन्त्री-शताब्दीसम्मेलनम्</u>

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् भारतं स्वीकायानां कृषकाणां, मत्स्यपालकाणां च हितविषये कदापि सन्धिं न करिष्यति । अद्य नवदिल्ल्यां एम-एस्-स्वामिनाथन्-शताब्दी-अन्ताराष्ट्रिय-सम्मेलनम्, इत्येतत् सम्बोधयता प्रधानमन्त्रिणा एतत् वक्तव्यं सबलं प्रतिपादितं यत् कृषकाणां कल्याणम् एव तस्य सर्वकारस्य सर्वोच्चप्राथमिकता अस्ति । सः अवदत् यत् कृषकाणाम् आयं वर्धयितुं कृषिकार्ये व्ययं न्यूनीकर्तुं च सर्वकारः निरन्तरं कार्यं कुर्वन् अस्ति। सः अकथयत् यत् सर्वकारेण कृषकाणां शक्तिः राष्ट्रप्रगत्याः आधाररूपेण अङ्गीकृता अस्ति ।

अद्य भारतं जगति दुग्ध-धान्य-जूटानां प्रथमोत्पादकः देशः अस्ति इति प्रधानमन्त्रिणा प्रकाशितम्। सः अवदत् यत्, गतवर्षे भारते खाद्यान्नस्य सर्वाधिकं उत्पादनम् संसूचितम् । सः अवदत् यत्, डा. स्वामिनाथन्-वर्यः भारतं खाद्योत्पादने स्वावलम्बनं प्रति नेतुं आन्दोलनस्य नेतृत्वं कृतवान् । सः जलवायु-प्रतिरोधिनां सस्यानाम् अधिकाधिकान् सस्य-प्रकारान् , उष्ण-प्रतिरोधि-सस्यानि च विकसितुं ध्यानस्य आवश्यकता सबलं प्रतिपादितवान् ।

स्वामिनाथनवर्यं भारतरत्न-पुरस्कारेण सम्मानयितुं सर्वकारेण अवसरः प्राप्तः इति प्रधानमन्त्री अकथयत् । विगतदशवर्षेषु हस्त-तन्तुवयनेन सम्पूर्णे देशे नूतनपरिचयः शक्तिः च प्राप्ता इति अपि प्रधानमन्त्री प्रोक्तवान् ।

------------------------------------------

राष्ट्रियसुरक्षापरामर्शदः-रूसः

राष्ट्रियसुरक्षापरामर्शदः अजीत-डोभालः अद्य मास्कोनगरे रूसस्य सुरक्षापरिषदः प्रमुखेन सर्गेई-शोइगु इत्यनेन सह मिलितवान्। श्रीडोभालः अवदत् यत्, भारतस्य रूसदेशेन सह विशिष्टाः पुरातन-सम्बन्धाः सन्ति तथा च अनेन सम्बन्धानां महत्वं प्रतिपद्यते ।

------------------------------------------

संसत्-स्थगनम्

अस्य सप्ताहस्य चतुर्थदिने अपि बिहारराज्ये आयोजितस्य विशिष्ट-गहन-संशोधन-अभियानम् अन्यविषयान् च अधिकृत्य विपक्षिदलानां विरोधेन लोकसभायाः राज्यसभायाः च कार्याचरणं बाधितम् अभवत् । विपक्षिदलानां कोलाहलमध्ये उभयसदने पूर्णदिवसाय स्थगिते अभवताम् । अपराह्ने द्विवादने द्वितीय-स्थगनस्य अनन्तरं यदा लोकसभायाः उपवेशनम् अभवत् तदा विपक्षदलानि सदन-मध्ये आगत्य विशिष्ट-गहन-संशोधनस्य विषये चर्चां याचितवन्तः। कोलाहल-मध्ये एव सभया मणिपुर-वस्तु-सेवा-करस्य संशोधन-विधेयकम्, मणिपुर-विनियोगस्य विधेयकं च स्वीकृतम्। विशिष्ट-गहन-संशोधनम् अधिकृत्य विपक्षिदलानां निरन्तरं विरोध-प्रदर्शनं दृष्ट्वा पीठासीन-अधिकारी असन्तोषं प्रकटितवान्, तेन चर्चायां भागं स्वीकृत्य

स्वकीयानां संवैधानिक-कर्तव्यानां पालनं कर्तुं ते सांसदाः स्मारिताः । कोलाहल-मध्ये अध्यक्षेण सभा पूर्णदिवसाय स्थगिता। राज्यसभायाम् अपि एतादृशानि एव दृश्यानि द्रष्टुमागतानि । अपराह्ने द्विवादने प्रथमस्य स्थगनस्य अनन्तरं यदा सभा समारब्धा तदा विपक्षदलानि विशिष्ट-गहन-संशोधनविषये उच्चैर्घोषं कर्तुम् आरभन्त। कोलाहल-मध्ये सभया तटीय-नौवहन-विधेयकम् स्वीकृतम्। राज्यसभायां विपक्षस्य नेता मल्लिकार्जुन-खड्गे अवदत् यत्, विपक्षिदलानि विशिष्ट-गहन-संशोधनविषये समर्थनं दातुं सज्जानि सन्ति, परञ्च सभायाम् अस्मिन् विषय़े चर्चायाः अनुमतिः अवश्यं प्रदातव्या । पीठासीन-अधिकारी अवदत् यत्, विरोधं कुर्वन्तः सांसदाः सभायां शिष्टाचारं न पालयन्ति । कोलाहल-मध्ये अध्यक्षेण सभायां पूर्णदिवसाय स्थगिता।

---------------------------------------------

## उत्तरकाशी-उद्धारकार्यम्

उत्तराखण्डे उत्तरकाशीमण्डलस्य धाराली-हरसिल-क्षेत्रयोः मेघविस्फोटस्य भूस्खलनस्य च अनन्तरम् अद्य बृहदस्तरीयाणि साहाय्योद्धार-कार्याणि तृतीयदिने अपि प्रचलन्ति । सेना, आरक्षि, एनडीआरएफ, एसडीआरएफ, आईटीबीपी, नागरिकप्रशासन चेत्यदीनां प्रायः अष्टादशाधिक-पञ्चशतं कर्मचारिणः उद्धार-प्रयासेषु सक्रियरूपेण संलग्नाः सन्ति, तत्रैव चतुर्दशाधिक-अष्टशतं अतिरिक्त-कर्मचारिणः साहाय्यार्थं सज्जाः सन्ति अस्यां घटनायां पञ्चाशततोऽप्यधिकाः जनाः लुप्ताः सन्ति इति सूचना अस्ति । तेषु एकः भारतीयसेनायाः जेसीओ, अष्टौ सैनिकाः च सन्ति। उद्धारावधौ नव-सैन्यकर्मचारिणः त्रयः नागरिकाः च विमानेन देहरादूननगरं प्रति प्रेषिताः, गम्भीररूपेण घातिताः त्रयः नागरिकाः एम्स्-ऋषिकेशं प्रति प्रेषिताः।

---------------------------------------------

## प्रधानमन्त्री-तन्तुवयनदिवसः

प्रधानमंत्रिणा नरेंद्रमोदिना अद्य राष्ट्रिय-हथकरघा-दिवस इत्यस्मिन् अवसरे देशवासिभ्यः शुभकामनाः प्रदताः । एकस्मिन् सामाजिकसंदेशपटले प्रकाशिते संदेशे, श्रीमोदी

अकथयत् यत् एषः दिवसः भारतस्य समृद्ध-वयन-परम्परायाः रूपेण आचर्यते, येन नागरिकाणां रचनात्मकतायाः प्रदर्शनं क्रियते । प्रधानमंत्रिणा भारतस्य हस्त-वयन-वैविध्यम्, आजीविकां , समृद्धिं च अग्रे नेतुं अस्य भूमिका सहर्षं प्रशंसिता।

-------------------------------------------

## निर्वाचनायोगः-उपराष्ट्रपतिनिर्वाचनम्

निर्वाचनायोगः अद्य उपराष्ट्रपति-निर्वाचनाय नामाङ्कनं प्रख्यापितुम् अधिसूचनां प्रकाशितवान् । अस्य मासस्य एकविंशति-दिनाङ्कं यावत् उपराष्ट्रपति-पदाय नामाङ्कनं विधातुं शक्यते निर्वाचनं च सितम्बरमासस्य नवदिनाङ्के भविष्यति ।विगतमासे उपाध्यक्षपदात् जगदीप-धनखड़ः इत्यस्य त्यागपत्रप्रदानान्तरं एतत् निर्वाचनम् आवश्यकम् अस्ति । एतत् सप्ततितमम् उपराष्ट्रपति-निर्वाचनं भविष्यति । अवधेयं यत् उपराष्ट्रपतिनिर्वाचनं एकेन निर्वाचकमण्डलेन क्रियते, यस्मिन् लोकसभायाः राज्यसभायाः च सदस्या सम्मिलिता) भवन्ति। अधिसूचनायाः अनुसारम्, पदेच्छुकाः प्रत्याशिनः अस्य मासस्य एकविंशति-दिनाङ्कं यावत् स्वकीयं नामाङ्ककनं कर्तुं शक्नुवन्ति । नामांकनपत्राणाम् अन्वीक्षणं अगस्तमासस्य द्वाविंशति-दिनाङ्के भविष्यति अपि च नामाङ्कनप्रत्यावर्तनस्य अन्तिमा तिथिः अस्य मासस्य पञ्चविंशतिदिनाङ्कः अस्ति ।मतानां गणना सितम्बरमासस्य नवदिनाङ्के भविष्यति ।

## जम्मूकश्मीरः-सीआरएफदुर्घटना

जम्मू-कश्मीरस्य धामपुर-जनपदे अद्य केंद्रियारक्षिबलस्य त्रयान् सुरक्षाकर्मिणः नीयमानम् एकं वाहनं मार्गात् स्खलितो भूत्वा नालिकायाम् अपतत् येन तेषां मृत्युरभवत् अन्ये पञ्चदशसैनिकाः च व्रणिताः अभवन् । एषा घटना कंदवा-क्षेत्रे सञ्जाता यदा सुरक्षाकर्मिणः बसंत-गढ़े एकस्मात् अभियानात् प्रत्यागच्छन्ति स्म। वाहने त्रयोविंशतिकर्मिणः आरूढाः आसन् येषु द्वौ जनौ घटनास्थले एव मृत्युं प्राप्तवन्तौ षोडशजनाः च व्रणिताः अभवन् । व्रणिताः चिकित्सालयं प्रति नीताः यत्र उपचारावधौ एकः अपरः सैनिकः अपि मृत्युमवाप्नोत् ।

-------------------------------------------

**ऋतुविज्ञानविभागः**

ऋतुविज्ञानविभागेन अद्य अरुणाचलप्रदेशे, मेघालये, नागालैण्डराज्ये, मणिपुरे, मिजोरमे, त्रिपुरायाम्, उपहिमालयीय-पश्चिमबङ्गे, सिक्किमे च अति वृष्टेः नारङ्गवर्णीया सञ्चेतना प्रसारितास्ति। उत्तराखण्ड-हिमाचलप्रदेशयोः अस्य मासस्य द्वादशदिनाङ्कपर्यन्तं प्रचण्डवृष्टिः भविष्यति इति विभागेन संभावना प्रकटिता । ऋतुविभागेन अद्य कर्नाटक-बिहार-झारखण्डेषु अपि एतादृशी परिस्थितिः अनुमिता अस्ति । अरुणाचलप्रदेशे श्वः प्रचण्डवृष्टिः भवितुं शक्नोति ।

।। इति वार्ता ।।